# एककम् - ४

# संस्कृतिः ।

विश्वमानवसङ्कल्पः सर्वधर्मसमभावना च भारतसंस्कृतेः मुखमुद्रा भवति ।

वेदोपनिषदः इतिहासपुराणादीनि धर्मशास्त्राणि च एतत्तत्वप्रतिपादकानि भवन्ति ।

उपदेशात्मिकाः कथाः अपि अस्मत्संस्कृतेरवयवाः भवन्ति ।

## पाठः - १

# ईशोपदेशः ।

# प्रोफ. पि.सि.देवस्या



प्रोफ. पि. सि. देवस्या महोदयः
१९०६ तमे वर्षे मार्च् मासस्य २४ तमे
दिने जनिमलभत ।प्लाक्किल् चेक्को देवस्य
इति पूर्णनामधेयस्य अस्य जन्मदेशः कोट्टयं
जिल्लायां कुटमालूर् देशः ।मलयालसंस्कृतभाषयोःस्नातकोत्तर- बिरुदधारी अयं
मार् इवनियोस् कलाशालायां प्राध्यापकः आसीत् ।अनेन बहवः कृतयः विरचिताः ।
तासु प्रमुखं भवति क्रिस्तुभागवतम् ।काव्यस्यास्य रचनया १९८० तमे वर्षे अयं
केन्द्रीयसाहित्य अक्कादमी द्वारा पुरस्कृतः ।केरलसाहित्य- अक्कादमी
पुरस्कारः अपि महाभागमेनम् अन्वग्रहीत् ।स्वस्य शततमे वयसि
२००६ अक्तूबर् १० दिनाङ्के महानुभाऽयं दिवंगतः ।

वेदैः इतिहासपुराणादिभिः काव्यनाटकादिभिश्च सम्पुष्टा भासते संस्कृतभाषा। संस्कृतभाषायां रचिताः अभिज्ञानशाकुन्तलप्रभृतयः बहवः ग्रन्थाः विश्वप्रसिद्धाः एव। न केवलं पौराणिककाले आधुनिककालेऽपि बह्व्यः रचनाः संस्कृतभाषायां रचिताः प्रसिद्धीकृताश्च विराजन्ते। केरलीयाः अनेके संस्कृतोपासकाः कवयः च आसन्, तेषु प्रातस्मरणीयः भवति क्रिस्तुभागवताख्यस्य महाकाव्यस्य कर्ता प्रोफ. पि. सि. देवस्यामहोदयः। श्रीयेशुदेवस्य जीवनचरितमवलम्ब्य संस्कृतभाषायां रचितं प्रथमं महाकाव्यं भवति क्रिस्तुभागवतम्। ३३ सर्गात्मके अस्मिन् काव्ये उत्तम काव्यस्य गुणान् द्रष्टुं शक्नुवन्ति। जोसफस्य विवाहार्थं कन्यादर्शनादारभ्य येशुदेवस्य स्वर्गारोहणं यावत् सम्पूर्णं चरितं काव्येऽस्मिन् वर्णितं वर्तते।

काव्यस्यास्य सप्तदशे सर्गे शिष्यान् प्रति येशुदेवस्य उपदेशाः वर्णिताः उपलभ्यन्ते। पर्वतोपरि स्थित्वा कृतस्यास्य उपदेशस्य गिरिप्रभाषणम् इति प्रसिद्धिः। तस्मादुद्धृताः केचन श्लोकाः पाठभागे अत्र समाकलिताः।

यूयं स्वधर्माचरणं परेषा-
मालोकनार्थं जनतासमक्षम् ।
मा कार्ष्ट नाकस्थपितुर्न लभ्यो
यद्येवमुत्तुङ्गकृपाप्रसादः ।।

# प्रश्नानाम् उत्तराणि क्रमीकृत्य अन्वयं लिखत।

| | |
|---|---|
| अस्मिन् वाक्ये क्रियापदं किम् ? | उत्तुङ्गकृपाप्रसादः |
| किं न लभ्यः? | न लभ्यः |
| कस्य प्रसादः ? | मा कार्ष्ट । |
| किं चेत् ? | जनता समक्षम् । |
| द्वितीयं क्रियापदं किम् ? | नाकस्थपितुः |
| कुत्र मा कार्ष्ट ? | एवं यदि । |
| किमर्थम् ? | आलोकनार्थम् । |
| केषाम् ? | यूयम् । |
| किं मा कार्ष्ट ? | परेषाम् |
| के ? | स्वधर्माचरणम् |

# क्रमीकृतः अन्वयः ।

| | |
|---|---|
| अस्मिन् वाक्ये क्रियापदं किम् ? | न लभ्यः |
| किं न लभ्यः? | उत्तुङ्गकृपाप्रसादः । |
| कस्य प्रसादः ? | नाकस्थपितुः |
| किं चेत् ? | एवं यदि । |
| द्वितीयं क्रियापदं किम् ? | मा कार्ष्ट । |
| कुत्र मा कार्ष्ट ? | जनता समक्षम् । |
| किमर्थम् ? | आलोकनार्थम् । |
| केषाम् ? | परेषाम् । |
| किं मा कार्ष्ट ? | स्वधर्माचरणम् । |
| के ? | यूयम् । |

| | |
|---|---|
| नाकस्थपितुर्न ( र् =: ) | नाकस्थपितुः + न |
| गतिर्न ( र् =: ) | गतिः + न |
| शिशोर्मातरम् ( र् =: ) | शिशोः + मातरम् |
| मुनिर्मुरभित्कुटुम्बिनीम् ( र् =: ) | मुनिः + मुरभित्कुटुम्बिनीम् |
| पदचित्रैर्नवनीतकोमलैः ( र् =: ) | पदचित्रैः + नवनीतकोमलैः |
| पितुर्वाक्यपरिपालनाय ( र् =: ) | पितुः + वाक्यपरिपालनाय |
| मातुर्मुखेन ( र् =: ) | मातुः + मुखेन |

| | |
|---|---|
| यद्येवम्( य् = इ/ ई + स्वराः) | यदि+ एवम् |
| इत्यस्य | इति + अस्य |
| यद्यपि | यदि+ अपि |
| झटित्येव | झटिति + एव |
| प्रविशत्येकवेणीधारी | प्रविशति + एकवेणीधारी |
| जनन्यत्र | जननी+ अत्र |
| इत्युक्त्वा | इति + उक्त्वा |

| | |
|---|---|
| जनतासमक्षम् | अक्ष्णोः समीपं समक्षम्, जनतायाः समक्षम् । |
| अम्बासमक्षम् | अक्ष्णोः समीपं समक्षम्, अम्बायाः समक्षम् । |
| अध्यापिकासमक्षम् | अक्ष्णोः समीपं समक्षम्, अध्यापिकायाः समक्षम् । |
| सीतासमक्षम् | अक्ष्णोः समीपं समक्षम्, सीतायाः समक्षम् । |
| नाकस्थः | नाके स्थितः । |
| गृहस्थः | गृहे स्थितः । |
| देशस्थः | देशे स्थितः । |

ददाति भिक्षां तु भवान् यदातदा
न कारयेत्तूर्यनिनादमग्रतः ।
नृणां विलोकं स्तवनं च लिप्सवः
सभासु रथ्यासु च दाम्भिकाः यथा ।।

# प्रश्नानाम् उत्तराणि क्रमीकृत्य अन्वयं लिखत।

| | |
|---|---|
| अस्मिन् वाक्ये क्रियापदं किम् ? | तूर्यनिनदम् |
| कुत्र न कारयेत् ? | अग्रतः |
| किं न कारयेत् ? | न कारयेत् |
| कासु? | दाम्भिकाः |
| पुनः कासु ? | धर्मसभासु |
| के ? | रथ्यासु |
| कीदृशाः दाम्भिकाः ? | विलोकं |
| किं लिप्सवः? | स्तवनम् ( च) |
| पुनः किं लिप्सवः ? | लिप्सवः |
| केषां विलोकम् ? | तदा |
| कदा ? | नृणां |
| किं करोति ? | भवान् तु |
| किं ददाति ? | भिक्षां |
| कस्तु ? | ददाति |
| कदा ? | यदा |

# क्रमीकृतः अन्वयः ।

| | |
|---|---|
| अस्मिन् वाक्ये क्रियापदं किम् ? | न कारयेत् । |
| कुत्र न कारयेत् ? | अग्रतः |
| किं न कारयेत् ? | तूर्यनिनदम् |
| कासु? | रथ्यासु |
| पुनः कासु ? | धर्मसभासु |
| के ? | दाम्भिकाः |
| कीदृशाः दाम्भिकाः ? | लिप्सवः |
| किं लिप्सवः? | स्तवनम् ( च) |
| पुनः किं लिप्सवः ? | विलोकं |
| केषां विलोकम् ? | नृणां |
| कदा ? | तदा |
| किं करोति ? | ददाति |
| किं ददाति ? | भिक्षां |
| कस्तु ? | भवान् तु |
| कदा ? | यदा |

| | |
|---|---|
| तूर्यनिनादः | तूर्यस्य निनादः । |
| शङ्खनिनादः | शङ्खस्य निनादः । |
| खाण्डीवनिनादः | खाण्डीवस्य निनादः । |
| वाद्यनिनादः | वाद्यस्य निनादः । |

भिक्षा त्वया दक्षिणहस्तदत्ता
मा ज्ञायतां वामकरेण ते सा ।
दानस्य चैवं निभृतं कृतस्य
पिता फलं दास्यति गुप्तदर्शी ।।

# प्रश्नानाम् उत्तराणि क्रमीकृत्य अन्वयं लिखत।

| | |
|---|---|
| अस्मिन् वाक्ये क्रियापदं किम् ? | पिता |
| कः दास्यति ? | दास्यति। |
| कीदृशः पिता ? | गुप्तदर्शी |
| किं ? | दानस्य |
| कस्य फलम् ? | फलं। |
| कीदृशस्य दानस्य ? | एवं निभृतं कृतस्य |
| पुनः क्रियापदं किम् ? | मा ज्ञायतां |
| केन ? | सा भिक्षा |
| का ? | ते वामकरेण |
| कीदृशी भिक्षा ? | दक्षिणहस्तदत्ता |
| कया ? | त्वया |

# क्रमीकृतः अन्वयः ।

| | |
|---|---|
| अस्मिन् वाक्ये क्रियापदं किम् ? | दास्यति । |
| कः दास्यति ? | पिता |
| कीदृशः पिता ? | गुप्तदर्शी |
| किं ? | फलं । |
| कस्य फलम् ? | दानस्य |
| कीदृशस्य दानस्य ? | एवं निभृतं कृतस्य |
| पुनः क्रियापदं किम् ? | मा ज्ञायतां |
| केन ? | ते वामकरेण |
| का ? | सा भिक्षा |
| कीदृशी भिक्षा ? | दक्षिणहस्तदत्ता |
| कया ? | त्वया |

| | |
|---|---|
| चैवम् ( ऐ = अ / आ + ए / ऐ ) | च + एवम् |
| मैवम् ( ऐ = अ / आ + ए / ऐ ) | मा + एवम् |
| सदैव ( ऐ = अ / आ + ए / ऐ ) | सदा + एव |
| सहैव( ऐ = अ / आ + ए / ऐ ) | सह + एव |
| अत्रैव ( ऐ = अ / आ + ए / ऐ ) | अत्र + एव |
| तत्रैव ( ऐ = अ / आ + ए / ऐ ) | तत्र + एव |
| तथैव ( ऐ = अ / आ + ए / ऐ ) | तथा + एव |

| | |
|---|---|
| दक्षिणहस्तदत्ता | दक्षिणश्चासौ हस्तश्च दक्षिणहस्तः, तेन दत्ता । |
| वामहस्तदत्ता | वामश्चासौ हस्तश्च वामहस्तः, तेन दत्ता । |
| विनयहस्तदत्ता | विनयश्चासौ हस्तश्च विनयहस्तः, तेन दत्ता । |
| बलिष्ठहस्तदत्ता | बलिष्ठश्चासौ हस्तश्च बलिष्ठहस्तः, तेन दत्ता । |
| गुप्तदर्शी | गुप्तं दर्शनं शीलमस्येति । |
| विषमदर्शी | विषमं दर्शनं शीलमस्येति । |
| समदर्शी | समं दर्शनं शीलमस्येति । |

यदा पुनस्त्वं भजनं करोषि
तदा समो मा भव दाम्भिकैस्त्वम् ।
परावलोकाय हि ये भजन्ति
समाजगेहे च चतुष्पथे च ।।

# प्रश्नानाम् उत्तराणि क्रमीकृत्य अन्वयं लिखत ।

| | |
|---|---|
| अस्मिन् वाक्ये क्रियापदं किम् ? | दाम्भिकैः समः |
| कीदृशैः समः मा भव ? | मा भव । |
| किं कुर्वद्भिः ( कैः) ? | भजन्ति हि ( तैः) |
| कुत्र ? | परावलोकाय |
| पुनः कुत्र ? | समाजगेहे |
| किमर्थम् ? | चतुष्पथे |
| के ? | ये |

# क्रमीकृतः अन्वयः ।

| | |
|---|---|
| अस्मिन् वाक्ये क्रियापदं किम् ? | मा भव । |
| कीदृशैः समः मा भव ? | दाम्भिकैः समः |
| किं कुर्वद्भिः ( कैः) ? | भजन्ति हि ( तैः) |
| कुत्र ? | चतुष्पथे |
| पुनः कुत्र ? | समाजगेहे |
| किमर्थम् ? | परावलोकाय |
| के ? | ये |

| | |
|---|---|
| पुनस्त्वम् ( स् =: ) | पुनः + त्वम् |
| पुनस्तव ( स् =: ) | पुनः + तव |
| पुनस्त्वया ( स् =: ) | पुनः + त्वया |
| पुनस्तु ( स् =: ) | पुनः + तु |
| हरिस्तव ( स् =: ) | हरिः + तव |
| नरस्तव( स् =: ) | नरः + तव |
| ततस्सर्पः( स् =: ) | ततः + सर्पः |

| | |
|---|---|
| दाम्भिकैस्त्वम् ( स् =: ) | दाम्भिकैः + त्वम् |
| अम्बायास्सकाशम्( स् =: ) | अम्बायाः + सकाशम् |
| देवगुरोस्तपोवने ( स् =: ) | देवगुरोः + तपोवने |
| महतस्तेजसः ( स् =: ) | महतः + तेजसः |
| वाच्यस्त्वया ( स् =: ) | वाच्यः + त्वया |
| यस्तु ( स् =: ) | यः + तु |
| | |

यदा पुनः प्रार्थयते तदा गृहं
प्रविश्य बद्ध्वा च कवाटमेककः ।
कुरु स्वतातं प्रति याचनां रहः
पिता फलं दास्यति गुप्तदर्शकः ।।

# प्रश्नानाम् उत्तराणि क्रमीकृत्य अन्वयं लिखत ।

| | |
|---|---|
| अस्मिन् वाक्ये क्रियापदं किम् ? | फलं |
| किं दास्यति ? | दास्यति । |
| कः फलं दास्यति ? | पिता |
| कीदृशः पिता ? | याचनां कुरु |
| किं कुरु ? | गुप्तदर्शकः |
| कथं ? | रहः |
| क प्रति ? | स्व तातं प्रति |
| कीदृशः सन् ? | गृहं प्रविश्य |
| पुनः कथं ? | कवाटं बद्ध्वा च |
| कुत्र प्रविश्य ? | एककः सन् |
| कदा ? | प्रार्थयसे |
| किं कुर्वते ? | तदा |
| पुनः कदा ? | पुनः यदा ( त्वम्) |

# क्रमीकृतः अन्वयः ।

| | |
|---|---|
| अस्मिन् वाक्ये क्रियापदं किम् ? | दास्यति । |
| किं दास्यति ? | फलं |
| कः फलं दास्यति ? | पिता |
| कीदृशः पिता ? | गुप्तदर्शकः |
| किं कुरु ? | याचनां कुरु |
| कथं ? | रहः |
| क प्रति ? | स्व तातं प्रति |
| कीदृशः सन् ? | एककः सन् |
| पुनः कथं ? | कवाटं बद्ध्वा च |
| कुत्र प्रविश्य ? | गृहं प्रविश्य |
| कदा ? | तदा |
| किं कुर्वते ? | प्रार्थयसे |
| पुनः कदा ? | पुनः यदा ( त्वम्) |

| | |
|---|---|
| स्वतातम् | स्वस्य तातः स्वतातः , तम् । |
| स्वसोदरम् | स्वस्य सोदरः स्वसोदरः , तम् । |
| स्वपुत्रम् | स्वस्य पुत्रः स्वपुत्रः , तम् । |
| स्वजनकम् | स्वस्य जनकः स्वजनकः , तम् । |
| स्वदेशम् | स्वस्य देशः स्वदेशः , तम् । |
| स्वराष्ट्रम् | स्वस्य राष्ट्रः स्वराष्ट्रः , तम् ।। |
| स्वराज्यम् | स्वस्य राज्यः स्वराज्यः , तम् । |